दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-329 | 1 | सितम्बर 24, 2025 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**

अद्य सिद्धार्थी वि.सं. २०८२,
कलियुगाब्धः ५१२७ शरद-ऋतुः
सूर्यः दक्षिणायनम् आश्विन्शुक्लतृतीया
आश्विन ०९ प्रविष्ठांशः मङ्गलमयः भवेत्

2 अनाथानाम् भविष्यं सुनिश्चितं करोति राज्यसर्वकारः, प्रतिष्ठितविद्यालयेषु नामाङ्कनं कारितम्

3 संस्कृताध्ययनात् परं शिक्षणजगति आजीविकानां द्वाराणाम् उद्घाटनं स्वयमेव भवति- डा. सवितुर प्रकाशगंगवारः

4 चन्द्रघण्टायाः ध्यानेन पूजनेन च सांसारिकेभ्यः कष्टेभ्यः भवति मुक्तिः

## सुभाषितम्

**सर्वाबाधाविनिर्मुक्तो, धनधान्यसुतान्वितः।
मनुष्यो मत्प्रसादेन, भविष्यति न संशयः॥**

अर्थात्- मनुष्य मेरे प्रसाद से सब बाधाओं से मुक्त तथा धन, धान्य एवं पुत्रादि से सम्पन्न होगा- इसमें कोई भी सन्देह नहीं है।

## संयुक्तराष्ट्र-महासभायाः अशीतितम-अधिवेशनस्य उच्चस्तरीयचर्चा



**हिमसंस्कृतवार्ताः** - संयुक्तराष्ट्र-महासभायाः अशीतितम-अधिवेशनस्य उच्चस्तरीयचर्चा आरभ्यते । वैश्विकसङ्घर्षस्य, फिलिस्तीनदेशस्य मान्यता च प्रमुखविषयेषु सम्मिलिताः सन्ति । संयुक्तराष्ट्रसङ्घस्य महासभायाः अशीतितमस्य अधिवेशनस्य उच्चस्तरीयचर्चा आरभ्यते। अस्य सत्रस्य कृते न्यूयोर्कनगरे विश्वनेतारः एकत्रिताः सन्ति। गाजा-युक्रेन-देशयोः युद्धानि, फिलिस्तीन-देशस्य पृथक् देशत्वेन वर्धमाना पाश्चात्य-मान्यता च चर्चायां प्रमुखाः विषयाः भवितुम् अर्हन्ति। अस्मिन् वर्षे विषयः अस्ति शान्तिः, विकासः, मानवाधिकारः च एषां कृते एकत्रतानि अशीति वर्षाणि ततोपि अधिकानि च।

## आयुष्मान-भारत इत्यनेन उपक्रमेण भारते सार्वजनिक-स्वास्थ्यसेवायां क्रान्तिः दृश्यते- प्रधानमन्त्री नरेन्द्रमोदी




**हिमसंस्कृतवार्ताः** - आयुष्मान-भारत इति प्रधानमन्त्री-जन-आरोग्य-योजना सप्तवर्षाणि पूरयति। राज्ञीतः अष्टादशोत्तरद्विसहस्रतमवर्षस्य सितम्बर-मासे आरब्धा एषा विश्वस्य बृहत्तमा सर्वकारीय-वित्तपोषिता स्वास्थ्य-आश्वस्ति-योजना अस्ति। योजनेयं भारते स्वास्थ्यसेवायां परिवर्तनं कृतवती। प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत्, आयुष्मान्-भारत इति योजनया भारते सार्वजनिक-स्वास्थ्यसेवायां क्रान्तिः दृश्यते । सामाजिक-प्रसार माध्यमेन श्रीमोदी अवदत् यत्, तेन वित्तीयसंरक्षणं सम्मानं च सुनिश्चितं कृतम्। प्रधानमन्त्री अवदत् यत्, आयुष्मानभारत इति एकः उपक्रमः अस्ति यो हि भविष्यस्य आवश्यकतानां पूर्वानुमानं कृत्वा जनेभ्यः उच्च-गुणवत्तायुतं सुलभ-स्वास्थ्यसेवाञ्च सुनिश्चेतुं केन्द्रितोऽस्ति। केन्द्रीय-स्वास्थ्य-मन्त्रिणः जगत्-प्रकाश-नड्डाइत्यस्य आङ्ग्ल-दैनिक पत्रिकायां लिखितं लेखं प्रसारयन्, श्रीमोदी अवदत् यत्, "आयुष्मान्-भारत" इति सार्वत्रिक स्वास्थ्यसेवायै जनान्दोलनस्य प्रतिज्ञा अस्ति। सः अवदत् यत्, एतत् परिवर्तनं कथं प्रत्येकं नागरिकस्य स्वास्थ्यस्य रक्षणार्थं सर्वकारस्य संकल्पस्य प्रमाणरूपेण वर्तते, अथ च राष्ट्रम् कियत् दूरं गतमिति च लेखः प्रकाशयति ।

## खाद्यसुरक्षायाः मानकाः विनियमाश्च नियमितरूपेण नवीनीकृताः भवेयुः - जगत-प्रकाश्-नड्डा




दृष्टिकोणस्य आवश्यकतायाः विषये अवधानं दत्तवान्। नवदेहल्यां वैश्विक खाद्य-नियामक-शिखरसम्मेलने मानकचिह्नस्य, विवरणपत्रस्य च अनावरणं कृत्वा सः सम्बोधयन् आसीत्। खाद्यसुरक्षायाः मानकाः विनियमाश्च नियमितरूपेण नवीनीकृताः भवेयुः इति मन्त्री दृढतया अवोचत्। श्रीनड्डाः, भारतीय खाद्यसुरक्षा-मानक-प्राधिकरणस्य खाद्यसुरक्षायाः मानकं वर्धयितुं अथ अस्मिन् महत्त्वपूर्णक्षेत्रे वैश्विकप्रगतिं प्रति योगदानं दातुञ्च महत्त्वपूर्णां भूमिकां स्वीकृतवान्।

## सुप्रसिद्धः अभिनेता मोहनलालः दादासाहेब फाल्के पुरस्कारेण सम्मानितः



हिमसंस्कृतवार्ताः - एकसप्ततितमे राष्ट्रियचलच्चित्र-पुरस्कारसमारोहे, शाहरुख खानाय जवान इति चलचित्राय विक्रान्तमेस्सी इत्यस्मै 12वीं फैल इत्येदर्थं च सर्वश्रेष्ठनटत्वेन पुरस्काराः प्रदत्ताः, रानी मुखर्जी इत्येषा मिसेस चेटर्जी वर्सेस नार्वे इति चित्रफलकाय सर्वश्रेष्ठ-अभिनेतृत्वेन पुरस्कारं प्राप्तवती। 'कठहल अ ज्याक्फ्रूट् मिस्टरी' इति सर्वश्रेष्ठहिन्दीचलचित्रस्य पुरस्कारं प्राप्तम्। एतदतिरिच्य, सुप्रसिद्धः अभिनेता, निर्देशकः, निर्माता च मोहनलालः चलचित्रक्षेत्रे सर्वोच्च-मान्यतारूपेण दादासाहेब फाल्के इति पुरस्कारेण सम्मानितः। अवधेयमस्ति यत् नवदेहली-नगरस्य विज्ञानभवने अयं कार्यक्रमः आयोजितः। राष्ट्रपतिः द्रौपदी मुर्मु इत्येषा विजेतृभ्यः पुरस्कारान् प्रददात्। चलचित्रनिर्माणस्य, कथा कथनस्य, अभिनयस्य च उत्कृष्टतायाः उत्सवार्थं विभिन्नेषु वर्गेषु पुरस्काराः प्रदत्ताः। अस्मिन् अवसरे उत्पलदत्तः सर्वश्रेष्ठचलचित्रविमर्शकस्य राष्ट्रियचलच्चित्रपुरस्कारं असमीयभाषायाः चलचित्रस्य विषये तस्य विस्तृतमहत्त्वपूर्णाय च विमर्शात्मकलेखनाय प्राप्तवान्। रिम्डोगिट्टङ्ग सर्वश्रेष्ठ-गारो-चलचित्रस्य पुरस्कारं प्राप्नोत् । निर्देशिका शिल्पिका बोर-दो-लोयी 'मौः द स्पिरिट् ड्रीम्स् आफ् चेराव्' इति चलच्चित्राय सर्वश्रेष्ठ-प्रथम-निर्देशक-चलचित्रस्य पुरस्कारं प्राप्तवती ।

## असम-राज्यस्य प्रसिद्ध-गायकस्य जुबीन गर्गस्य कामरूपजनपदे पूर्णराज्यसम्मानेन सह दाहसंस्कारः कृतः

हिमसंस्कृतवार्ताः - प्रसिद्धस्य असमस्य गायकस्य जुबीन गर्गस्य कामरूपजनपदे पूर्णराज्यसम्मानेन सह दाहसंस्कारः कृतः। असमप्रदेशे लोकप्रियस्य गायकस्य जुबीनगर्गस्य पूर्णराज्यसम्मानेन सह अन्तिमः संस्कारः विहितः। अन्त्येष्ट्याम् असमस्य मुख्यमन्त्री हेमन्तबिस्वा सरमा, केन्द्रीयमन्त्री किरेन रिजिजुः, सर्वानन्द सोनोवालः च उपस्थिताः आसन्। पुरोहिताः मन्त्रोच्चारणम् कृतवन्तः, प्रशंसकाः तस्य गीतानि च गायन्ति स्म।

## दीपावलि-छठ्-उत्सवेषु यात्रिकाणां सौख्यार्थ द्वादश-सहस्र-विशेष-रेलयानानि सञ्चाल्यन्ते - रेलमन्त्री अश्विनी वैष्णवः

हिमसंस्कृतवार्ताः - रेल्मन्त्री अश्विनी वैष्णवः उक्तवान् यत् दीपावली-छठ्-इत्यादिषु प्रमुखेषु उत्सवेषु बहुसंख्यकाः जनाः आगच्छन्ति। अतः एतेषु उत्सवेषु द्वादशसहस्र विशेषरेलयानानि चालयिष्यति इति घोषितवान्।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## महाराष्ट्रस्य पालघर-जनपदे वाडाक्षेत्रे गोवर्धन पर्यावरणग्रामे "देसी भोजन मायने रखता है" इत्यस्य उपक्रमस्य शुभारंभः



पर्यावरणवनजलवायु परिवर्तनमंत्री भूपेन्द्र यादवः गतदिने महाराष्ट्रस्य पालघरजनपदे वाडाक्षेत्रे गोवर्धन पर्यावरणग्रामे "देसी भोजन मायने रखता है" इत्यस्य उपक्रमस्य शुभारंभं कृतवान्। अस्मिन् अवसरे वदन् सः अवदत् यत् ई-अपशिष्टं प्रमुखा समस्या अभवत्। यादवमहोदयेन ऊर्जायाः रक्षणाय, जलस्य संरक्षणाय, स्थायिजीवनशैल्याः प्रवर्धनाय च गोवर्धन इको ग्रामस्य प्रशंसा कृता। मानवस्वास्थ्यस्य पर्यावरणस्य च कृते पारम्परिकभोजनव्यवस्थानां महत्त्वे अपि सः बलं दत्तवान् ।

## Himachal News: रोबोटिक-शल्यक्रियायाः शुल्कं नियतम्



**हिमसंस्कृतवार्ताः- शिमला।** अटल- सुपरस्पेशलिटी- आयुर्विज्ञान संस्थाने चमियाणायाः चिकित्सालये रोगिणां कृते रोबोटिक-शल्यक्रियायाः प्रारम्भात् मासद्वयं गतम्। चिकित्सालय-प्रबन्धनेन रोबोटिकशल्यक्रियायाः शुल्कं निर्धारितम् अस्ति, येन सामान्यजनाः अस्याः अत्याधुनिकशल्यक्रियाप्रविधेः लाभं प्राप्नुवन्ति। रोबोटिक-शल्यक्रियायाः शुल्कं ₹३०,००० इति निर्धारितम् अस्ति, यत् पीजीआई, चण्डीगढम् इत्यादिषु प्रसिद्धानां संस्थानानां शुल्कस्य तुलनायाम् अस्ति। चिकित्सालयस्य वरिष्ठचिकित्साधीक्षकः डॉ. सुधीरशर्मा इत्यनेन उक्तं यत् अधुना चमियाणा- चिकित्सालये रोबोटिक- शल्यक्रिया- सुविधा पूर्णतया प्रचलति, शुल्कमपि निर्धारितम् अस्ति। पीजीआई- सदृशानां संस्थानानां शुल्कानां समानं शुल्कं निर्धारितम् अस्ति, येन रोगिणां परदेशयात्रायाः आवश्यकता नास्ति, अत्र च उत्तमां चिकित्सां प्राप्तुं शक्नुवन्ति। रोबोटिक- शल्यक्रियायाः कारणेन अधिकजटिल- शल्यक्रियाः, यथा प्रोस्टेट, वृक्क- अर्बुद- कर्क्कट- इत्येतेषां कृते अधिकसटीकतया, न्यूनतया च वेदनायाः कर्तुं शक्यन्ते अनया प्रौद्योगिक्या शल्यक्रियापश्चात् पुनर्प्राप्तेः समयः अपि न्यूनीकरोति, येन रोगिणः शीघ्रं स्वस्थतां प्राप्य गृहं प्रत्यागन्तुं शक्नुवन्ति। हिमाचलप्रदेशसदृशे पर्वतीयराज्ये एतादृशप्रौद्योगिक्याः प्रवर्तनं चिकित्साक्षेत्रे प्रमुखा उपलब्धिः अस्ति। एतेन न केवलं राज्यस्य निवासिनः चिकित्सायै बृहत्तरनगरेषु गन्तुं आवश्यकतां रक्षिष्यन्ति, अपितु तेषां समयस्य धनस्य च रक्षणं भविष्यति।

### १.५ लक्षरूप्यकाणि यावत् अस्ति रोबोटिकशल्यक्रियायाः व्ययः

वास्तविकव्ययः प्रायः १.५ लक्षरूप्यकाणि भवति। अस्मिन् महत्साधनानाम् उपयोगः, प्रशिक्षितानां शल्यचिकित्सकानाम् उपयोगः, तान्त्रिकसमर्थनम् च अन्तर्भवति। परन्तु एतत् सर्वकारीयचिकित्सालयम् इति कारणतः अत्र रोगिणां कृते केवलं ३०,००० रुप्यकेन एषा सुविधा उपलब्धा क्रियते। एतेन न केवलं रोगिणां धनस्य रक्षणं भविष्यति अपितु तेभ्यः उन्नतप्रौद्योगिकी अपि प्राप्यते।

### गोबिन्दसागरसरोवरे जलक्रीडाकार्यक्रमाः आरब्धाः, गतिं प्राप्स्यति पर्यटनव्यवसायः।

**हिमसंस्कृतवार्ताः- डॉ पद्मनाभः।** हिमाचलप्रदेशस्य बिलासपुरजनपदे मङ्गलवासरे गोबिन्दसागरसरोवरे जलक्रीडाकार्यक्रमाणां विधिवदारम्भः सम्पन्नः। उपायुक्तः राहुलकुमारः गतिनौकां क्रूज इत्यारोहणं च अनुभूतवान्। तेनोक्तं यत्, "जिलाप्रशासनस्य उद्देश्यं बिलासपुरं साहसिकक्रीडानां प्रमुखकेन्द्रं कर्तुमस्ति।" गतवर्षे मुख्यमन्त्रिणा सुखविन्द्रसिंहेन जलक्रीडायाः शुभारम्भः कृतः आसीत्, अधुना तु सः अधिकसङ्घटिततरं आकर्षकरूपेण च प्रगम्यते। उपायुक्तेनोक्तं यत्, "जनपदे जलक्रीडा, आकाशक्रीडा, अन्यसाहसिकक्रीडाः च प्रवर्धयितुं विशेषप्रयत्नाः क्रियन्ते।"एतेन न केवलं पर्यटनक्षेत्राय लाभः भविष्यति, अपि तु स्थानीयव्यापारकार्यमपि वर्धिष्यते। तेनोक्तं यत्, "आगामिवर्षेषु बिलासपुरं राष्ट्रिय- अन्ताराष्ट्रीयस्तरे साहसिकक्रीडाक्षेत्रे ख्यातिं प्राप्स्यति।" गोबिन्दसागरसरोवरस्य, भाखड़ाबन्धस्य तटे, चण्डीगढ- मनाली- चतुष्पंक्तिमार्गस्य समीपे च स्थितत्वा जलक्रीडायै उपयुक्तस्थानं भवति।

## अनाथानाम् भविष्यं सुनिश्चितं करोति राज्यसर्वकारः, प्रतिष्ठितविद्यालयेषु नामाङ्कनं कारितम्

**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्री सुखविन्दरसिंहसक्खोः नेतृत्वे वर्तमानराज्यसर्वकारेण अनाथबालानां उज्ज्वलभविष्यं सुनिश्चितं कर्तुं दृढ़पदं स्वीकृतम्। समाजस्य अन्यबालानां इव अनाथाः अपि गुणवत्तापूर्णशिक्षां प्राप्नुवन्तु इति राज्यसर्वकारः सुनिश्चितं कुर्वन् अस्ति। एतदर्थं राज्यसर्वकारेण तेषां कृते राज्ये प्रतिष्ठितशैक्षिकसंस्थासु प्रवेशः आरब्धः। एतेन उपक्रमेण अल्पवयसि एव मातापितरौ त्यक्त्वा सुशिक्षायाः स्वप्नं न दृष्टाः एते बालकाः अधुना प्रतिष्ठितविद्यालयेषु अध्ययनं कृत्वा स्वप्नानां पूर्तये अवसरं प्राप्नुवन्ति। राज्यसर्वकारस्य प्रवक्ता अवदत् यत् मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः प्रयत्नात् अधुना राज्ये सर्वत्र प्रतिष्ठितविद्यालयेषु अनाथानां नामाङ्कनं क्रियते। सः अपि अवदत् यत् सोलनस्य पाइनेग्रोव- पब्लिक- विद्यालये चत्वारः, शिमला-नगरस्य ताराहॉल- विद्यालये त्रयः, दयानन्द-पब्लिक-विद्यालये अष्टौ च अनाथाः नामाङ्किताः सन्ति। अस्य उपक्रमस्य उद्देश्यं एतेषां बालकानां अन्येषां छात्राणां इव शिक्षायां, क्रीडायां, सहपाठ्यक्रमक्रियासु च समानावकाशान् प्रदातुं वर्तते, येन ते वंचिताः न अनुभवन्ति।प्रवक्ता अवदत् यत् सर्वकारः अन्यैः प्रतिष्ठितैः विद्यालयैः सह अपि सम्पर्कं साधयति येन उत्तमाः शैक्षिकाः अवसराः प्राप्यन्ते। सः अपि अवदत् यत् एतेषां बालकानां कृते जीविका- प्रधान- उच्चशिक्षायाः कृते अपि आर्थिकसाहाय्यं प्रदत्तं भवति येन ते स्वावलम्बी भवितुम् अर्हन्ति। सः अपि अवदत् यत् मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः दूरदर्शिनेतृत्वस्य फलस्वरूपं राज्यसर्वकारेण अनाथबालानां कृते "मुख्यमन्त्री सुखाश्रययोजना" अपि आरब्धा अस्ति। राज्ये अनाथबालानां सुरक्षायाः शिक्षया साकं अन्यासां च सुविधानां सुनिश्चितिं कर्तुम्एषा योजना प्रारब्धा। प्रवक्ता अवदत् यत् पदं स्वीकृत्य मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खोः नेतृत्वे वर्तमानसर्वकारेण राज्यस्य सर्वेभ्यः अनाथबालेभ्यः "राज्यस्य बालकाः" इति स्थितिः प्रदत्ता।



सांकेतिक चित्रम्

अस्य अन्तर्गतं राज्यसर्वकारः तेषां परिचर्यायाः, रक्षणस्य, शिक्षायाः च उत्तरदायित्वं यावत् ते २७ वर्षाणि न प्राप्नुवन्ति तावत् यावत् वहति।सः अवदत् यत् प्रत्येकस्मिन् पाठ्यक्रमे अनाथबालानां कृते एकं आसनं सर्वेषु सर्वकारीयेषु, सर्वकारसहायकेषु, निजीतकनीकीशिक्षणसंस्थासु आरक्षितम् अस्ति, यत्र आईटीआई, पॉलीटेक्निक, अभियांत्रिकी, औषधशास्त्रमहाविद्यालयाः च सन्ति, येन तेभ्यः अन्येषां छात्राणां इव व्यावसायिकप्रशिक्षणं प्राप्तुं समानाः अवसराः प्राप्यन्ते।सः अवदत् यत् राज्यसर्वकारः एतेषां बालकानां कृते देशस्य ऐतिहासिकस्थलानां प्रमुखनगराणां च भ्रमणार्थं संपर्कन-भ्रमणस्य आयोजनमपि करोति, यत्र विमानयात्रा, त्रितारकहोटेलेषु निवासः च इत्यादयः सर्वे व्ययः सर्वकारेण एव वहिताः सन्ति। सः अवदत् यत् विपन्नजनानाम् उत्थानं राज्यसर्वकारस्य सर्वोच्चप्राथमिकता अस्ति। अनाथबालानां कल्याणाय विशेषविधानं कृत्वा तेषां गरिमापूर्णजीवनस्य, परिचर्यायाः, शिक्षायाः च अधिकाराः सुनिश्चित्य हिमाचलप्रदेशः देशस्य प्रथमं राज्यं जातम्।

## आनलाईन- भविष्यति चिकित्सौषधानां संचालनम्, डिजीटलपटलं प्रारब्धम्



**हिमसंस्कृतवार्ताः- शिमला।** राष्ट्रिय- आयुर्वेददिवसस्य अवसरे हिमाचलप्रदेशस्य आयुषविभागेन शिमलानगरस्य "होटल- हॉलिडे- होम" इत्यत्र "आयुर मंथनम् हिमाचले आयुषः सततविकासस्य मार्गः" इति एकदिवसीया संगोष्ठी आयोजिता। कार्यक्रमे १०० तः अधिकाः जनाः उपस्थिताः आसन्, येषु विभागस्य वरिष्ठाधिकारिणः, विशेषज्ञाः, उद्योगनेतारः, आयुषसंस्थानां प्रतिनिधयः, स्थानीय- उद्यमिनः, समुदायस्य अन्ये सदस्याः च आसन्।आयोजनस्य अध्यक्षता आयुषमन्त्री यादविन्द्रगोमा अकरोत्। अस्मिन् अवसरे 'आयुषसङ्कलनम्' इति डिजिटलपटलं प्रारब्धम्। एतेन औषधानां, रोगीनां अभिलेखानां, कर्मचारिणां उपस्थितिः च ऑनलाइन- लेखाकरणं सक्षमं भविष्यति। एतेन पारदर्शिता सुनिश्चिता भविष्यति, शीघ्रं प्रतिवेदनं च सुनिश्चितं भविष्यति। सर्वकारेण सञ्चालितानां आयुर्वेदिकौषधशालानाम् अपि नूतनं प्रतीकचिह्नम् (लोगो) अनावृतम्। एताभ्यः औषधाशालाभ्यः अधुना 'हिमौषधम्' इति ब्राण्ड-नाम्ना औषधानां विपणनं भविष्यति इति घोषितम्।

### आयुषसेवाः केवलं चिकित्सायाम् एव सीमिताः न भवेयुः- यादविंद्रगोमा

आयुषमन्त्री यादविन्द्रगोमा इत्यनेन उक्तं यत् आयुषसेवाः केवलं चिकित्सायाम् एव सीमिताः न भवेयुः अपि तु जीविकायाः, कल्याणपर्यटनस्य, आर्थिकविकासस्य च माध्यमं भवतु इति सर्वकारस्य प्रयासः अस्ति। सचिवः आयुष शाइनामोल तथा निदेशकः आयुषः रोहितः जमवालः इत्यनेन विभागस्य भविष्यस्य योजनानां विषये अपि स्वविचाराः प्रकटिताः। तेषां कथनमस्ति यत् अन्यविभागैः सह सहकार्यं करणं, डिजिटलमञ्चानां माध्यमेन पारदर्शितायाः वर्धनम्, हिमाचलं पारम्परिकस्वास्थ्यस्य कल्याणस्य च केन्द्रं करणं च विभागस्य प्राथमिकता अस्ति। अस्मिन् वर्षे जनेभ्यः पृथिव्यै च विषयः आयुर्वेदः आसीत्। चर्चासु हिमाचलस्य जैवविविधतायाः पारम्परिकज्ञानस्य च उपयोगस्य आवश्यकतां जनस्वास्थ्यस्य पर्यावरणस्य च हिताय प्रकाशितम्। प्रथमसत्रे औषधीयवनस्पतयः, लघुवनोत्पादाः च इष्टतमप्रयोगे केन्द्रितः आसीत्। द्वितीयसत्रे सर्वकारीय- आयुष- औषधाशालानां सुदृढीकरणे केन्द्रितम् आसीत्।

# संस्कृताध्ययनात् परं शिक्षणजगति आजीविकानां द्वाराणाम् उद्घाटनं स्वयमेव भवति- डा. सवितुर प्रकाशगंगवारः



हिमसंस्कृतवार्ताः-उत्तरप्रदेश संस्कृतसंस्थानेन निदेशकस्य विनयश्रीवास्तवस्य मार्गदर्शने संचालितायाः ऑनलाइन प्रशिक्षण-पाठ्यक्रमनिर्माणयोजनायाः अंतर्गते संस्कृतभाषा शिक्षणकक्षासु प्रेरणासत्रस्य शुभारंभः प्रशिक्षुणी प्रियाशर्मा द्वारा सरस्वतीवन्दनया अभवत् तथा संस्थानगीतिका कवितावर्मा द्वारा प्रस्तुतिता। मुख्यातिथेः परिचयः संस्थानस्य परिचयः, मुख्यातिथीनां समागतानां च स्वागतं समन्वयकः दिव्यरंजनः कृतवान्। स्वागतगीतं प्रशिक्षिका पूजावाजपेयी द्वारा कृतम्। कार्यक्रमाणां क्रमे अनुभवकथन श्यामला, वैशाली च, सुभाषितं विनीता, एकलसंस्कृतगीतं चंद्रकला विजया च, सुभाषितांताक्षरी शोभारानी, पल्लवी, कुसुमः वाणी च प्रस्तुतवत्यः।मुख्यप्रेरकः डा॑. सवितुर प्रकाशगंगवारः महोदयः प्रेरणासत्रस्य संस्कृते जीविकानां अवसराः मुख्यविषयेऽस्मिन् प्रेरयित्वा उन्होंने बोधितवान् यत् संस्कृतभाषा न केवलं वेदपारायणाय पाण्डित्यकर्मार्थञ्च अपितु संस्कृत माध्यमेन अपि जीवकोपार्जनम् अत्यन्तं सरलम् अस्ति। शिक्षणक्षेत्रे अतिलाभदायकं भूत्वा अन्येषु क्षेत्रेषु यथा संस्कृते डायलॉगलेखनम्, संस्कृतगीतगायनं, संस्कृतसमाचारवाचनम् आदिषु विभिन्नेषु क्षेत्रेषु अपि कार्यं कृत्वा वयं सरलतया जीवीकोपार्जनं कर्तुं शक्नुमः। प्रशिक्षकः रजनीशतिवारी आगन्तुकानाम् अतिथीनां धन्यवादं ज्ञापितवान् तथा कार्यक्रमे अस्मिन् उत्तरप्रदेश संस्कृतसंस्थानस्य निदेशकः विनयश्रीवास्तवः, भाषाविभागस्य मुख्यसचिवः, प्रशासनिकाधिकारी जगदानन्दझा, दिनेशमिश्रः, योजनायाः प्रधानसहायकः भगवानसिंहचौहानः, प्रशिक्षणप्रमुखः सुधीष्ठमिश्रः, समन्वयकगणः धीरजमैठाणी, दिव्यरंजनः, राधाशर्मा च तथा संस्थानस्य प्रशिक्षकेषु महेन्द्रमिश्रः, गोपालकृष्णमिश्रः, गणेशदत्तद्विवेदी, शशिकान्तः, डा॑. स्तुतिगोस्वामी, अनीतावर्मा, इत्यादयः अन्ये सर्वे प्रशिक्षकाः उपस्थिताः आसन्। शान्तिमंत्रं प्रशिक्षुः अथर्वः अथ च तकनीकीसहयोगं प्रशिक्षकः ओमदत्तद्विवेदी कृतवान्। कार्यक्रमस्य संचालनं प्रशिक्षिका मीनाकुमारी कृतवती।

# श्रीसोमेश्वरनाथमहोत्सवः– २०२५ भव्यरूपेण आरब्धः



हिमसंस्कृतवार्ताः- कुणाल कौशिक, मोतिहारी। धार्मिकश्रद्धायाः सांस्कृतिकगौरवस्य च प्रतीकः श्रीसोमेश्वरनाथमहोत्सवः २०२५ मोतिहार्यां सोमवासरे महानन्देन भव्यरूपेण आरब्धः। कार्यक्रमस्य आरम्भः परम्परानुसारं दीपप्रज्वलनेन कृतः। दीपं प्रज्वालय उद्घाटनं कृतवन्तः सांसदः राधामोहनसिंहः, गन्नाउद्योगमन्त्री कृष्णनन्दन पास्वानः, केसरियाविधानसभासदस्या शालिनीमिश्रा, विधायकः सुनीलमणित्रिपाठी च।मञ्चे उपस्थिताः विशिष्टाः अतिथयः स्वेभ्यः भाषणेषु अवदन् यत् श्रीसोमेश्वरनाथमहोत्सवः केवलं धार्मिकः उत्सवः न, अपि तु सामाजिकसमरसतायाः सांस्कृतिकपरम्परायाः जनजनस्य आस्थायाश्च महापर्वः अस्ति। उद्घाटनसमये सहस्रशः भक्तजनाः, नागरिकाः, अधिकारीणः, समाजसेविनः, माध्यमप्रतिनिधयः च उपस्थिताः आसन्। सम्पूर्णं मण्डपं भक्तिगीतैः, धार्मिकानुष्ठानैः, सांस्कृतिकप्रस्तुतिभिः च निनादितम्। अस्मिन् महोत्सवे प्रथमदिने एव समग्रे प्रदेशे भक्त्याः उल्लासस्य च वातावरणं व्याप्य अभवत्। आगामिदिनेषु च अयं महोत्सवः विविधान् धार्मिकान्, सांस्कृतिकान्, सामाजिकान् कार्यक्रमान् प्रदर्शयन् जनमानसं आध्यात्मिकशक्त्या पूरयिष्यति।

# उत्तराखण्डे श्रीज्ञानीगोलोकधाम्नि देहराखासे देहरादूने शतचण्डीमहायज्ञस्य आयोजनम्, श्रद्धालवोगृह्णन् भागम्



देहराखास- भगवतो बद्रीविशालस्य कृपया श्रीज्ञानीगोलोकधाम्नि भक्ति-स्नेहपूर्णं महोत्सवः आयोज्य शतचण्डीमहायज्ञः संपद्यते। महायज्ञस्य आयोजनं डॉ. रमेशचन्द्रपाण्डेयः, जगद्गुरुशङ्कराचार्यज्योतिषपीठस्य धर्माधिकारी, उत्तराखण्डविद्वत्सभायाः संरक्षकः तथा श्रीज्ञानीगोलोकधामउत्तराखण्डस्य अध्यक्षः ज्योतिषाचार्यश्च समायोजयति। तेन यज्ञस्य महत्त्वं निर्दिशन्तः उक्तं यत् एषः आयोजनो केवलं धार्मिकसांस्कृतिकानां प्रतीकः न भवति, किन्तु सामाजिकस्य आध्यात्मिकस्य च समरसता संवर्धने अपि साहायकः। डॉ. पाण्डेयः अवोचत् यत् शतचण्डीमहायज्ञस्य विशेषः लक्ष्यः माता ब्रह्मचारिणीदेवी आराधनायाः। नवरात्रे द्वितीयदिने विशेषं सा पूज्यते। माता पार्वतीरूपेण प्रसिद्धा, साधना, संयमः, आध्यात्मिकशक्तिः च तदीय प्रतीकाः सन्ति। भक्ताः तस्या ध्यानं कुर्वन्ति, व्रतं धारयन्ति, जपं च कुर्वन्ति, यस्मात् आत्मिकशान्तिः ज्ञानं च प्राप्यते।ब्रह्मचारिणीदेव्याः स्वरूपं अत्यन्तं सरलम् सौम्य च, किन्तु प्रभावशाली अपि। तस्याः पूजया हृदयं संयम, ज्ञानं च शक्तिं च प्राप्नोति। शतचंडीमहायज्ञकाले तस्याः मन्त्राणि विधिपूर्वकं पाठ्यन्ते, आराधना च सम्पद्यते, येन वातावरणे आध्यात्मिकशक्तिः प्रवर्तते।

अत्र उपस्थिताः भक्ताः यज्ञार्थिनः च आचार्याणां मार्गदर्शनम् अनुसृत्य विधिपूर्वकं पूजा-अर्चना च सम्पादयन्ति, तथा देव्या कृपां हृदयेन प्रार्थयन्ति।अयं महायज्ञः आचार्य मनोजपाण्डेयः, लक्ष्मीप्रसादपाण्डेयः, आचार्य अनिलपाण्डेयः, मन्त्री प्रसाद थपलियालः, आचार्य धीरेन्द्रश्च नेतृत्वे सम्पादितः। अत्र भक्ताः इष्टमित्रजनाश्च बहु संख्या उपस्थिताः।शतचंडीमहायज्ञस्य आयोजनं न केवलं धार्मिकदृष्ट्या महत्त्वपूर्णं, किन्तु उत्तराखण्डे भक्ति-संस्कृतेः संवर्धनस्य शक्तिशाली उदाहरणम् अपि वर्तते।

# अध्येता इत्यस्य वार्तासंवादः

**नन्दिनी** - नमो वः। अद्यतने 'अध्येता' इत्यस्य वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या** - नमस्ते नन्दिनि। अद्यतनी वार्ता वस्तुतः रोचका अस्ति। प्रथमा वार्ता 'आत्मनिर्भरभारतम्' इति सङ्कल्पस्य पोषिका अस्ति। केन्द्रीयमन्त्री अश्विनी वैष्णवः 'स्वदेशीयानि' अङ्कीयसाधनानि स्वीकृतवान् अस्ति, नागरिकान् च तथैव कर्तुं प्रेरितवान् अस्ति।

**नन्दिनी** - सत्यम्, आत्मनिर्भरतायाः मार्गे एषः प्रशंसायोग्यः पदक्षेपः। द्वितीया वार्ता तु विदेशनीतिसम्बद्धा वर्तते। विदेशमन्त्री जयशङ्करः संयुक्तराष्ट्रस्य सामान्यसभायाः अधिवेशने अमेरिकीय-सभासदं रुबियो-महाभागं मिलितवान् अभूत्।

**काव्या** - आम्, अन्ताराष्ट्रिय-सम्बन्धेषु संवादः महत्त्वपूर्णः भवति। तृतीया वार्ता तु न्यायालयस्य विषये अस्ति। सर्वोच्चन्यायालयः पञ्चकोटिरूप्यकाणां भरणपोषणराशिं याचितवतीम् एकां महिलां भर्त्सितवान् अभूत्।

**नन्दिनी** - आम्, लोभः न उचितः इति न्यायालयस्य आशयः। अन्तिमा वार्ता तु अतीव साहसिकी अस्ति। एकः त्रयोदशवर्षीयः अफगानिस्थानीयः बालः देहलीम् आगच्छति विमाने निलीनः सन् पलायनं कृतवान् अभूत्।

**काव्या** - अहो, बालस्य धैर्यं तु आश्चर्यकरम्। अद्यतनी वार्तावली अत्रैव समाप्ता भवति। धन्यवादः।

**नन्दिनी** - धन्यवादः। पुनर्मिलामः।

ईदर-धीरजः, हिमसंस्कृतवार्ताः

# प्रतिपदायाः चन्द्रकलाः नवत्वस्य संदेशः

दर्शयत्यद्य शशिनः, कलिका लघ्वपि शुभ्रिका।
नवप्रभा नवं हर्षं, जनयत्यन्तरात्मनि।।1।।
उदयत्यद्य शशिकला, लघ्वी सौम्यप्रभा शिवा।
नवत्वं जीवनस्यैव, सूचयत्यन्तरात्मनि।।2।।
लघ्वी शशिकला ज्योत्स्ना, तमोऽपि भेदयत्यलम्।
यथा मनसि साधूनां, ज्ञानं दुःखं विनाशयेत्।।3।।

-डॉ महिमा शुक्ला



## "वन्दे संस्कृतमातरम्"
### "लौकिकन्यायकोशः"
## "धनञ्जयन्यायः"

एकमेव कर्म पुनः पुनः कर्तुं शक्यते इत्यस्मिन् अर्थे अस्य न्यायस्य प्रयोगः भवति। दैवपद्धत्या कृष्णः कौरवाणां पराभवं कृतवान् अनन्तरं युद्धे अर्जुनः अपि निमित्तीभूय पराजयं कृतवान्।

यथा- नित्यबोधमहिम्ना बाधितेऽपि द्वैते वाक्यबोधस्य, धनञ्जयन्यायेन बाधकत्वोपपत्तेः। यथाहुः-
नित्यबोधपरिपीडितं जगत् विभ्रमं नुदति वाक्यजा मतिः। वासुदेवनिहतं धनञ्जयो हन्ति कौरवकुलं यथा पुनः।।
{रघुनाथः लौकिकन्यायसाहस्रीतः}

डा वर्षा प्रकाश टोणगांवकर
पुणे/ महाराष्ट्रम्



## सरलात् कठिनं प्रति

•रामः अस्ति।
•रामः बालकः अस्ति।
•रामः एकः बालकः अस्ति।
•रामः एकः सुन्दरः बालकः अस्ति।
•रामः एकः सुन्दरः सुशीलश्च बालकः अस्ति।
•रामः एकः अतीव सुन्दरः सुशीलश्च बालकः अस्ति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पठति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं पठति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय पठति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय विद्यालयं गत्वा पठति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय विद्यालयं गत्वा गुरोः समीपे पठति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय विद्यालयं गत्वा गुरोः समीपे उपविश्य पठति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य पठति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन पठति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः प्रश्नान् पृच्छति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः प्रश्नान् पृच्छति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः महत्त्वपूर्णान् प्रश्नान् पृच्छति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः महत्त्वपूर्णान् प्रश्नान् अपि पृच्छति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः महत्त्वपूर्णान् प्रश्नान् दृष्ट्वा तत्रैव उत्तराणि प्राप्नोति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः महत्त्वपूर्णान् प्रश्नान् दृष्ट्वा तत्रैव उत्तराणि अपि प्राप्नोति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः महत्त्वपूर्णान् प्रश्नान् दृष्ट्वा तत्रैव जिज्ञासा पूर्त्यर्थम् उत्तराणि अपि प्राप्नोति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः महत्त्वपूर्णान् प्रश्नान् दृष्ट्वा तत्रैव जिज्ञासा पूर्त्यर्थं नैकानि उत्तराणि अपि प्राप्नोति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः महत्त्वपूर्णान् प्रश्नान् दृष्ट्वा तत्रैव जिज्ञासा पूर्त्यर्थं नैकानि महत्त्वपूर्णानि उत्तराणि अपि प्राप्नोति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः महत्त्वपूर्णान् प्रश्नान् दृष्ट्वा तत्रैव जिज्ञासा पूर्त्यर्थं नैकानि उत्तराणि अपि प्राप्नोति। प्रश्नानां उत्तराणि प्राप्य सः आनन्दमनुभवति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः महत्त्वपूर्णान् प्रश्नान् दृष्ट्वा तत्रैव जिज्ञासा पूर्त्यर्थं नैकानि उत्तराणि अपि प्राप्नोति। सर्वेषां प्रश्नानां उत्तराणि प्राप्य सः आनन्दमनुभवति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः महत्त्वपूर्णान् प्रश्नान् दृष्ट्वा तत्रैव जिज्ञासा पूर्त्यर्थं नैकानि उत्तराणि अपि प्राप्नोति। विषयाधारित सर्वेषां प्रश्नानां उत्तराणि प्राप्य सः आनन्दमनुभवति।
•रामः एकः अतीव सुन्दरः सुशीलश्च आज्ञापालकः बालकः अस्ति। अतः सः पुस्तकं ज्ञानार्जनाय स्वीय विद्यालयं गत्वा गुरोः समीपे उपविश्य ध्यानेन श्रद्धया च पठति। पुस्तकं पठित्वा सः ततः महत्त्वपूर्णान् प्रश्नान् दृष्ट्वा तत्रैव जिज्ञासा पूर्त्यर्थं नैकानि उत्तराणि अपि प्राप्नोति। विषयाधारित सर्वेषां प्रश्नानां उत्तराणि प्राप्य सः आनन्दमनुभवति। प्रसन्नो भूत्वा सः संस्कृत भाषां प्रति रुचिं प्रयच्छति।



**-डॉ. सन्तोषकुमारकाण्डपालः**
**सहायकाचार्यः (शिक्षाशास्त्र-विभागः)**
**महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी, मध्यप्रदेशः**




## चन्द्रघण्टायाः ध्यानेन पूजनेन च सांसारिकेभ्यः कष्टेभ्यः भवति मुक्तिः

ध्यानम् –
**पिण्डज प्रवरारूढ़ा चण्डकोपास्त्रकैर्युता ।**
**प्रसादं तनुते महयं चन्द्रघण्टेति विश्रुता ।।**

आदिशक्तेः दुर्गायाः तृतीयं स्वरूपं चन्द्रघण्टायाः वर्तते। नवरात्रमहोत्सवस्य तृतीये दिवसे चन्द्रघण्टायाः पूजनं भवति। मातुः चन्द्रघण्टायाः स्वरूपं शांतिदायकं कल्याणकारञ्च अस्ति। अस्याः मस्तके घण्टाकृतौ अर्धचन्द्रः विराजते। अनेनैव देव्याः नाम चन्द्रघण्टा अभवत्। मातुः विग्रहं स्वर्णसदृशं देदीप्यमानं वर्तते। अस्याः वाहनं सिंहः अस्ति। चन्द्रघण्टायाः उपासनया वयं सर्वेभ्यः सांसारिकेभ्यः कष्टेभ्यः विमुच्य परमपदं प्राप्तुं शक्नुमः।

मातुः दशसु हस्तेषु कमल- धनु- शर- कमंडलु- असि-त्रिशूल-गदादीनि अस्त्राणि सन्ति। कंठे श्वेतपुष्पाणां हारः शीर्षे च रत्नजडितमुकुटं सुशोभते। माता निज हस्ताभ्यां साधकेभ्यः दीर्घायोः आरोग्यस्य सुख-सम्पदायाः च वरं यच्छति। मातुः स्वरूपोद्भवादेव असुराणां विनाशो आरब्धः आसीत्। अस्याः पूजनात् केवलं बल-बुद्धे विकासो शैल भवति अपितु युक्तिः शक्तिः प्रकृतिश्चापि साधकस्य अनुकूला भवति।

**चन्द्रघण्टायाः बीजमन्त्रं- ऐं श्रीं शक्तयै नमः।**




श्री चतुराननाननविशिष्टरसानटनात्तकिंकिणी
वाचितवेदघोषतनुपावितधातृमुखादिमंडले !
सूचितमोक्षमार्गभृतशुभ्रपुराणपरंपरात्मिके !
रोचितकाव्यभावरसरूपसरस्वति ! वाणि ते नमः !
🙏🙏🙏🙏

✍ **कोरिडे विश्वनाथ शर्मा ,धर्मपुरी ,तेलंगाणा**

## पति- पत्न्योः मध्ये

## हासपरिहासम्

पतिः पत्नीं भ्रमणार्थं नीतवान्।
पतिः- पश्यतु, एषः "इंडिया गेट" अस्ति ।
परञ्च पत्नी पतिम् उत्पीडयितुम् इच्छति स्म। सा पृष्टवती-
पत्नी- गेट इत्युक्ते द्वारं कुत्र अस्ति?
पतिः- कथं द्वारं, कस्य द्वारम्?
पत्नी- नाम तु "इंडिया गेट" अस्ति भो! गेट इत्युक्ते द्वारम्। अत्र तु द्वारं नास्ति।
अधुना मया ज्ञायते, कथम् आंग्लजनाः मुगलजनाः च भारतम् आगतवन्तः।
सर्वकारः द्वारं न निर्मितवान्। अतः आंग्लजनाः मुगलजनाः च भारतम् आगत्य, मूल्यवानाः रत्नमाणिक्याः चोरयित्वा गतवन्तः 😆😆😆
पतिः- 🤯🤯🤯🤯🤯